National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 87-89
© 2026 NJHSR
www.sanskritarticle.com

**प्रणव-माइतिः**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः,आन्ध्रप्रदेशः

**Correspondence:**
**प्रणव-माइतिः**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः,आन्ध्रप्रदेशः

# प्रसिद्धचम्पूकाव्येषु मङ्गलाचरणवैशिष्ट्यम्

**प्रणव माइतिः**

**सारांशः**

निर्विघ्नपरिसमाप्त्यर्थं कस्यचित् ग्रन्थस्यादौ मङ्गलाचरणं प्रस्तूयते। शोधलेखेऽस्मिन् त्रिविक्रमभट्टस्य नलचम्प्वाः, भोजराजस्य रामायणचम्प्वाः, वेङ्कटाध्वरिणो विश्वगुणादर्शचम्प्वाश्चेत्यादिषु ग्रन्थेषु विहितानां मङ्गलानां वैशिष्ट्यं विश्लेषितम्। एतेषु मङ्गलेषु न केवलमिष्टदेवतास्तुतिर्दृश्यतेऽपि तु श्लेषाद्यलंकाराणां छटा, ग्रन्थस्य विषयवस्तु, अन्तर्निहितस्य काव्यसौन्दर्यस्य माहात्म्यं च वर्ण्यते।

**कूटशब्दाः**

चम्पूकाव्यम्, मङ्गलाचरणम्, निर्विघ्नपरिसमाप्तिः, इष्टदेवतास्तुतिः, काव्यशास्त्रीयानुशीलनम्।

**उपोद्घातः**

**संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः**[1] **–** इति दण्डिवचनेन प्रमाणीक्रियते यत् संस्कृतभाषा देवभाषेति। सम्-पूर्वकात्कृ-धातोः क्त-प्रत्यये निष्पन्नस्य संस्कृतशब्दस्यार्थः संस्कारयुक्तम्, परिमार्जितम्, शुद्धम् अलङ्कृतं वा। महर्षिपाणिन्यादिवैयाकरणैः प्रकृतिप्रत्ययादिसंयोजनैः सुसंस्कृता भाषा संस्कृतभाषेत्यभिधीयते।

संस्कृतसाहित्यपरम्परायां गद्य-पद्य-मिश्रभेदेन काव्यं त्रिविधम् – **गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितमिति**[2]। पादचतुष्टयात्मकं पद्यम् वृत्तजातिभेदेन पुनर्द्विविधम्। पद्यकाव्यस्य मुक्तक-कुलक-कोष-सङ्घातादिभेदाः वृत्तजात्योरेवान्तर्भवन्ति। छन्दःशास्त्रविहितपादादिनियमरहितः सुप्तिङन्तपद-सन्निवेशो गद्यकाव्यमपि कथाख्यायिकाभेदेन द्विधा विभक्तम्। अग्निपुराणकारेण महर्षिव्यासदेवेन गद्यकाव्यं पञ्चधाभिहितम्।

**किन्नाम चम्पूकाव्यम्**

गद्यपद्यकाव्यभेदनिरूपणाभ्यां मिश्रकाव्यानां प्राप्तावसरः श्रव्यात्मकमिश्रकाव्यं चम्पूकाव्यं निरूपयिष्ये। गद्यपद्योभयात्मकमिश्ररचनाशैली काव्यशास्त्रे चम्पूरिति नाम्नाभिधीयते – **गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते**[3] इति। चम्पयति चम्पतीति वा व्युत्पत्त्या चुरादिगणीयाच्‘चपि’-धातोः उ-प्रत्यये चम्पूशब्दोऽयं निष्पद्यते। **चमत्कृत्य पुनाति सहृदयान् विस्मितीकृत्य प्रसादयतीति चम्पूः**[4] **-** इति साहित्यदर्पणस्य कुसुमप्रतिमाटीकायां हरिदाससिद्धान्तवागीशेन न्यगादि। अर्थात् या चमत्कारि-वैचित्र्येण सहृदयानां मनसि आनन्दं समुत्पादयति सा चम्पूः। गद्यकाव्यानाम् अर्थगौरवत्वात् पद्यकाव्यानाञ्चार्थगौरवोपस्कृतरागमयत्वादुभाभ्यां सङ्गताभ्यां यथा चमत्कार उत्पद्यते न तथा पृथक्। तथाह्याकूतं –

**गद्यानुबन्धरसमिश्रितपद्यसूक्ति-**
**हृद्या हि वाद्यकलया कलितेव गीतिः।**
**तस्माद्दधातु कविमार्गजुषां सुखाय**
**चम्पूप्रबन्धरचनां रसना मदीया॥**[5]**इति**

यथा वीणादिवाद्ययन्त्रसहिता गीतिः श्रोतृणां हृदये नितरां नन्दयति, तथैव गद्यभागोपेतपद्यमयी काव्यरचना सहृदयचेतांसि भृशम् आह्लादयति। संस्कृतसाहित्यसदसि उपलब्धान ञ्चत्वारिंश दुत्तर-

द्विशतसंख्यकानां गद्यपद्यात्मकमिश्रशैल्युपेतचम्पूकाव्यानां परम्परा वैदिककालादेव समारब्धा – **"हरिश्चन्द्रो ह वैधस, ऐक्ष्वाको राजाऽपुत्र आस .......।**

**यं न्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न ।**

**किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद"।।**[6] **इति।**

**किन्नाम मङ्गलम् –**

कार्यारम्भे मङ्गलाचरणं, दूरदेशगमनात् पूर्वमीश्वरनामस्मरणम्, गुरुजनचरणयुगलस्पर्शनं, ग्रन्थरचनादौ ईश्वरस्तुतीत्यादीनि भारतीयसंस्कृतेर्विशेषाङ्गानि। ग्रन्थप्रारम्भे मङ्गलाचरणेन ग्रन्थस्य निर्विघ्नपरिसमाप्तिरिति प्राचीनाः, नेति विरुद्धवादिनः। ते भिन्नं मतं पोषयन्ति, यथा – बाणभट्टप्रणीतप्रसिद्धकथाकाव्ये कादम्बर्यां मङ्गलाचरणसत्त्वे ग्रन्थासमाप्तिः, पुनः बौद्धादिनास्तिकप्रणीतग्रन्थे मङ्गलासत्त्वेऽपि निर्विघ्नग्रन्थसमाप्तिरिति। प्राचीनाः पुनः बाणभट्टस्य विघ्नबाहुल्यात् ग्रन्थासमाप्तिरिति युक्तिं प्रदर्श्य मङ्गलाचरणसार्थकतां द्योतयन्ति। आशीर्नमस्क्रियावस्तुनिर्देशभेदेन मङ्गलाचरणस्य त्रैविध्यम् । यत्र ग्रन्थकारैः स्वेष्टदेवेभ्यो गुरुभ्यो वा नमस्कारो निवेद्यते तत्र नमस्कारात्मकं मङ्गलाचरणमित्यभिधीयते। यत्र च देवतायाः परमेश्वरस्य वा सकाशात् पाठकानां श्रोतॄणां च मङ्गलकामनायै आशीर्वचनं प्रार्थ्यते तत्राशीर्वादात्मकं मङ्गलाचरणमित्याख्यायते। किञ्च, यत्र देवतायाः स्तुत्या सह ग्रन्थस्य विषयवस्तु उल्लिख्यते तत्र वस्तुनिर्देशात्मकं मङ्गला-चरणमिति। अतो निर्विघ्नग्रन्थसमाप्त्यर्थं शिष्टाचारपरिपालनाय च ग्रन्थकारैर्ग्रन्थादौ मङ्गलं विधीयते। तथाहि महाभाष्यवचनम् – **"मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्या-युष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्यु"रिति**[7]**।**

**नलचम्पूकाव्ये मङ्गलाचरणम् –**

संस्कृतसाहित्ये प्रसिद्धचम्पूकाव्येषु प्राचीनतमं चम्पूकाव्यं नेमादित्यसूनुना श्रीधरपौत्रेण शाण्डिल्यगोत्रोद्भूतेन तत्रभवता त्रिविक्रमभट्टेन विरचितं सप्तोच्छ्वासोपेतं शृङ्गाररससमन्वितं महाभारतवनपर्वणो नलोपाख्यानकथाश्रितं श्लेषपूर्णोलङ्कृतं नलचम्पूकाव्यमिति। तत्रभवान् त्रिविक्रमभट्टो ग्रन्थस्य निर्विघ्न-परिसमाप्त्यर्थं ग्रन्थादौ नमस्कारात्मकमङ्गलाचरणेन स्वेष्टदेवं परमेश्वरं शङ्करमेव स्तौति -

**जयति गिरिसुतायाः कामसन्तापवाहि-**

**न्युरसि रसनिषेकश्चान्दनश्चन्द्रमौलिः।**

**तदनु च विजयन्ते कीर्तिभाजां कवीना-**

**मसकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः॥**[8] **इति।**

गिरिसुता पार्वती शिवं प्रति कामासक्ता। तस्याः कामसन्तापं दूरीकर्तुं शङ्कर एव प्रभवति। अतः पार्वत्याः कामदाहपीडिते वक्षसि चन्दनरसवत् चन्द्रमौलिः (चन्द्रः मोलौ यस्य सः) चन्द्रशेखरः शिवः सर्वोत्कर्षेण वर्तते। तदनन्तरमेव (इष्टदेवतास्तुत्यनन्तरमेव) यशस्विनां व्यासवाल्मीकिकालिदासादीनां सूरीणां निरन्तरं पीयूषकणान् स्रवन्तः काव्यप्रबन्धाः सर्वोत्कर्षेण राजन्ते।

श्लोकपूर्वार्धेनात्र वक्ष्यमाणं कथावस्तु सूचितम् – गिरिः भीमनृपः **("गिरिर्भीमनृपे सूर्ये स्वभावे पर्वते जले इत्युक्तेः")** तस्याः सुतायाः कन्यायाः दमयन्त्याः कामसन्तप्तपीडिते वक्षसि चन्दनरसवत् चन्द्रमौलिः – चन्द्रः चन्द्रवंशः, तस्य मोलौ वर्तते यः स, चन्द्रवंशशिखरीभूतो नलः सर्वोत्कर्षेण राजते नमस्यः इत्यर्थः। चन्द्रमौलीति पदेनैतदपि द्योत्यते यत् चन्द्रस्यामृतांशुत्वात् शीतांशुत्वाद्वा तस्य शीतलतया पार्वत्याः सन्तापः प्रशमिष्यति। किञ्च, यथा चन्द्रप्रकाशेनान्धकारो विनङ्क्ष्यति, तथैवास्य ग्रन्थस्य प्रकाशेन पाठकस्य ज्ञानान्धाकारो दूरीभविष्यतीति।

मालिनीछन्दोऽलङ्कृते मङ्गलेऽस्मिन् भगवति शिवे चन्दनरसनिषेक-स्याभेदकल्पनाद्रूपकालङ्कारः।

'असकृतमृतबिन्दुस्यन्दिनः' इत्यत्र कोमलपदप्रयोगात् माधुर्यगुणो वैदर्भी च रीतिः।

**चम्पूरामायणे मङ्गलाचरणम् –**

प्रसिद्धचम्पूकाव्येषु धारानरेशेन विद्यापतिना मालवचक्रवर्तिना सर्वज्ञसार्वभौमेन महाराजभोजदेवेन षड्काण्डोपेतम् अपूर्वपदप्रयोग-सौन्दर्यालङ्कृतं वाल्मीकिरामायणाश्रितं चम्पूरामायणं व्यरचि। **आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्**[9]- इत्यादौ प्रारम्भे आशीःपदप्रयोगात् आशीर्वादात्मकमङ्गलाचरणेन गणेशचरणयुगलं कविर्भोजदेवः स्तौति –

**लक्ष्मीं तनोतु नितरामितरानपेक्ष-**

**मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।**

**हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं**

**विघ्नाद्रिभेदशतधारधुरंधरं नः॥**[10] **इति।**

वेदान्तप्रतिपाद्यं कमनीयकमलसौन्दर्यगर्वापहारकं विघ्नरूपमहापर्वत-विदारणाय वज्रायुधसदृशं च सामर्थ्यशालि भगवतो गणेशस्य चरणारविन्दयुगलम् अन्यानपेक्षया अतिशयेनास्माकं शोभासम्पत्तिं विस्तारयतु सम्पादयतु वेत्यर्थः।

शास्त्रेषु इष्टकार्यसम्पादनार्थं सर्वादौ विघ्नेश्वरस्य विनायकस्य भगवतश्च श्रीगणेशस्यार्चितत्वात् मङ्गलेऽस्मिन् स एवादौ पूजितः। त्रिणि विशेषणान्यत्र गणेशस्य चरणयुग्मस्योत्कर्षं ज्ञापयन्ति। गणेशस्य चरणयुगलकान्तिः कमलशोभामपि अपहरतीति कमलादपि तदुत्कर्षमावहति। भक्तानां मार्गम् आगतानां विघ्नरूपविशालपर्वतानां विनाशने इन्द्रायुधतुल्यं चरणयुगलमिति इन्द्रायुधेन सह चरणयुगलस्योत्कर्षं प्रतिपादयति।

वसन्ततिलकावृत्तोपेते श्लोकेऽस्मिन् विघ्ना एव पर्वताः इति विघ्नाद्रिः, निगमा एव शाखिनः इति निगमशाखीत्यादौ रूपकालंकारः।'लक्ष्मीं तनोतु' इत्यत्राभिलषितवस्तुनः प्राप्तित्वादा-शीर्नामालंकारः। 'हैरम्ब-मम्बुरुहडम्बर' इत्यत्र मकार-बकारयोः, 'धुरंधरं नः'इत्यत्र च नकारधकारयोर्योगान्माधुर्यगुणः, अल्पवृत्तित्वात् पाञ्चालीरीत्यो-पस्कृतः श्लोकोऽयम्।

**विश्वगुणादर्शचम्प्वां मङ्गलाचरणम् –**

चम्पूकाव्येषु विश्वगुणादर्शचम्पूरिति चम्पूकाव्यं श्रीरघुनाथदीक्षित-पुत्रेण अप्पयगुरुपौत्रेण श्रीरामानुजमतानुयायिना वेङ्कटाध्वरिणा व्यरचि। तत्र ग्रन्थादौ कविना आशीर्वादात्मकमङ्गलाचरणं प्रस्तूयते–

**श्रीराजीवाक्षवक्षःस्थलनिलयरमाहस्तवास्तव्यलोल-**
**लीलाब्जान्निष्पतन्ती मधुरमधुझरी नाभिपद्मे मुरारेः।**
**अस्तोकं लोकमात्रा द्वियुगमुखशिशोराननेष्वर्प्यमाणं**
**शङ्खप्रान्तेन दिव्यं पय इति विबुधैः शङ्क्यमाना पुनातु॥**[11] **इति।**

कमलायतलोचनस्य भगवतः श्रीमन्नारायणस्य वक्षःस्थले नित्यं निवसन्ती या भगवती लक्ष्मीः, तस्याः हस्तकमले शोभितात् चञ्चलात् लीलाम्भोजात् निःसरन्ती काचन मधुरा मकरन्दधारा सैव भगवतो मुरारेर्नाभिकमले निपतति। तां पतन्तीं मकरन्दधारां दृष्ट्वा देवैरुत्प्रेक्ष्यते यत् लोकमाता लक्ष्मीः शङ्खाग्रभागेन स्वशिशवे अर्थात् नाभिकमले स्थिताय चतुर्मुखाय ब्रह्मणे प्रभूतं दिव्यं दुग्धं पाययन्ती अस्ति। एवं देवैः साभिलाषं सम्भाव्यमाना दिव्या मकरन्दधारा अस्मान् सर्वान् पवित्रीकरोत्विति।

स्रग्धरावृत्तोपेते मङ्गलेऽस्मिन् लक्ष्मीकरस्थपद्मान्नाभिकमले मकरन्दधारायां, ब्रह्मणे पीयमानस्य दिव्यपयसः सम्भावना-दुत्प्रेक्षालङ्कारः। 'मधुरमधुझरी', 'लीलाब्जान्निष्पतन्ती', इत्यादौ कोमलश्रुतिमधुरव्यञ्जनवर्णाधिक्यान्माधुर्यगुणः पाञ्चाली च रीतिः, आचार्यदण्डिमतानुसारं प्रथमे चरणे दीर्घसमासबद्धत्वात् ओजोगुणो गौडी च रीतिः। सुदीर्घसमासालंकृतपदप्रयोगेण किञ्च, 'द्वियुगमुखशिशुरि'त्यत्र द्वे युगे युग्मे चत्वारि, मुखानि यस्य सः, तस्य ब्रह्मणः शिशुत्ववैचित्र्यपूर्णपदप्रयोगेण च कवेः प्रगाढपाण्डित्यं द्योत्यते। 'मधुरमधुझरी' इत्यत्र मकार-धकार-रेफाणां प्रयोगेणानु-प्रासालङ्कारः सहृदयानां चेतांसि आह्लादयति।

**उपसंहारः –**

नलचम्पूकथा रामायणचम्पूकथा च महाभारतरामायणयोर्वर्णित-त्वादपि अत्र वैचित्र्यालंकारालंकृतेन गद्यपद्यमिश्ररूपेण च प्रयोगात् सहृदयानां हृदयानि आह्लादयति। नलचम्प्वाः मङ्गलाचरणे श्लेषमाध्यमेन नलदमयन्त्योः कथावस्तुवर्णनात् वस्तुनिर्देशात्मकं वैशिष्ट्यं द्योत्यते। वसन्ततिलकावृत्तोपेते भोजप्रणीतचम्पूरामायणस्य मङ्गले अतीव चमत्कारतया रूपकालङ्कारवर्णनं भोजराजस्य पदलालित्यम् अर्थगौरवञ्च प्रकटयति। वेङ्कटाध्वरिप्रणीतायाः विश्वगुणादर्शचम्प्वाः मङ्गले विष्णुस्तुतिर्विशिष्टाद्वैतवेदान्तानुसारं दार्शनिकचिन्ता विहितास्ति।

**सन्दर्भग्रन्थसूची –**


१. दण्डी। *काव्यादर्शः*। सम्पा. आचार्यः श्रीरामचन्द्रमिश्रः। वाराणसी: चौखम्बा विद्याभवन, १९९६(द्वितीयसंस्करणम्)।

२. त्रिपाठी छविनाथ। *चम्पू-काव्य का आलोचानात्मक एवं ऐतिहासिक अध्ययन*। वाराणसी: चौखम्वा विद्याभवन, १९६५(प्रथमसंस्करणम्)।

३. कविराजविश्वनाथः। *साहित्यदर्पणः*। सम्पा. अध्यापक उदयचन्द्र वन्द्योपाध्याय, डॉ. अनीता वन्द्योपाध्याय। कलकाता: संस्कृत बुक् डिपो, २०१२(तृतीयसंस्करणम्)।

४. भट्टत्रिविक्रमः। *नलचम्पूः*। सम्पा. डॉ. अञ्जालिका-मुखोपाध्यायः। कलकाता: संस्कृत बुक् डिपो, २०२०।

५. भट्टत्रिविक्रमः। *नलचम्पूः*। सम्पा. श्री परमेश्वरदीन पाण्डेय। सुधा-संस्कृत-हिन्दीव्याख्याद्वयोपेता। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०२४।

६. मम्मटः। *काव्यप्रकाशः*। सम्पा. डॉ. पारसनाथ द्विवेदी। आगरा: विनोद पुस्तक मन्दिर, १९८६।

७. भोजराजः। *चम्पूरामायणम्*। सम्पा. आचार्यः श्रीरामचन्द्रमिश्रः। प्रकश-संस्कृत-हिन्दीटीकोपेतम्। वाराणसी: चौखम्बा विद्याभवन, २०१९।

८. भोजराजः। *चम्पूरामायणम्*। सम्पा. रामचन्द्रबुधेन्द्रः। साहित्य-मञ्जूषाव्याख्यासमेतम्। मुम्बई: निर्णयसागराख्यमुद्रणयन्त्रालयः, १९१४(चतुर्थसंस्करणम्)।

९. वेङ्कटाध्वरी। *विश्वगुणादर्शचम्पूः*। सम्पा. प्रो. सुरेन्द्रनाथ शास्त्री। वाराणसी: चौखम्बा विद्याभवन, २०२१(पुनर्मुद्रितसंस्करणम्)।


**पाद टिप्पणी**

[1]काव्यादर्शः - १.३३
[2]काव्यादर्शः – १.११
[3]काव्यादर्शः - १.३१
[4]साहित्यदर्पणस्य कुसुमप्रतिमाटीकायाम्
[5]चम्पूरामायणम् - १.३
[6]ऋग्वेदस्यैतरेयब्राह्मणे हरिश्चन्द्रोपाख्याने
[7]महाभाष्यम् – १.१.१
[8]नलचम्पूः – १.१
[9]काव्यादर्शः – १.२४
[10]चम्पूरामायणम् – १.१
[11]विश्वगुणादर्शचम्पूः - १